This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

E

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र. M-2501 विषय संस्कृत काव्य

नाव रामायण किष्किंधाकांड

लेखक / लिपीकार

पृष्ठ 37 काळ पूर्ण / अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

M-2501

॥ किस्किंधाकांडप्रारंभः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा·कि·१ श्रीगणेशायनमः श्रीमहादेवउ· ततःसलक्ष्मणोरामः शनैः पंपासरस्तटं आ
१ गत्यसरसांश्रेष्ठं दृष्ट्वा विस्मयमाययौ १ क्रोशमात्रंसुविस्तीर्णमगाधामलशंब
रं उत्फुल्लांबुजकल्हारकुमुदोत्पलमंडितं २ हंसकारंडवाकीर्णंचक्रवाकादि टिटिभ
हरीतः= शोभितं जलकुक्कुटकोयष्टिक्रौंचनादोपनादितं ३ नानापुष्पलताकीर्णंनाना
फलसमावृतं संतामनः स्वच्छजलंपद्मकिंजल्कवासितं तत्रोपस्पृश्यसलि
लंपीत्वाश्रमहरंविभुः ४ सानुजःसरसस्तीरेशीतलेनपथाययौ ऋष्यमू
कगिरेः पार्श्वेगच्छंतौरामलक्ष्मणौ ५ धनुर्बाणकरौदांतौजटावल्कलमंडि
तौ पश्यंतौविविधान्वृक्षान्गिरेः शोभांसुविक्रमौ ६ सुग्रीवस्तुगिरेर्मूर्ध्नि १
चतुर्भिःसहवानरैः स्थित्वाददर्शतौयांतौआरुरोहगिरेःशिरः ७ भयाद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हहनूमंतंकौतौवीरवरौसखे गछुजानीहिभद्रंतेबटुर्भूत्वाद्विजाकृतिः ८
वालिनाप्रेषितौकिंवामांहंतुंसमुपागतौ ताभ्यांसंभाषणंकृत्वाजानीहिहृद
यंतयोः ९ यदितौदुष्टहृदयौसंज्ञांकुरुकराग्रतः साधुत्वेस्मितवक्त्रोभूरेवं
जानीहिनिश्चयं १० तथेतिबटुरूपेणहनुमान्समुपागतः विनयावनतो
भूत्वारामंनत्वेदमब्रवीत् ११ कौयुवांपुरुषव्याघ्रौयुवानौवीरसंमतौ द्योत
यंतौदिशःसर्वाःप्रभयाभास्कराविव १२ युवांत्रैलोक्यकर्त्तारावितिभातिमनो
मम युवांप्रधानपुरुषौजगद्धेतूजगन्मयौ १३ माययामानुषाकारौचरं
ताविवलीलया भूभारहरणार्थायभक्तानांपालनायच १४ अवतीर्णा
विहपरौचरंतौक्षत्रियाकृती जगत्स्थितिलयौसर्गंलीलयाकर्तुमुद्यतौ १५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰कि॰१ स्वतंत्रौ प्रेरकौ सर्वहृदयस्थाविहेश्वरौ नरनारायणौ लोके चरंताविति मे मतिः
२ १६ श्रीरामो लक्ष्मणं प्राह पश्यैनं बटुरूपिणं शब्दशास्त्रमशेषेण श्रुतं
नूनमनेकधा १७ अनेन भाषितं कृत्स्नं न किंचिदपशब्दितं ततः प्राह हनू
१८ मंतं राघवो ज्ञानविग्रहः १८ अहं दाशरथी रामस्त्वयं मे लक्ष्मणोऽनुजः सीत
या भार्यया सार्धं पितुर्वचनगौरवात् १९ आगतस्तत्र विपिने स्थितोहं दंडके
द्विज तत्र भार्या हृता सीता रक्षसा केनचिन्मम तामन्वेष्टुमिहायातौ त्वं को वा
कस्य वा वद २० बटुरुवाच सुग्रीवो नाम राजा यो वानराणां महामतिः चतुर्भि
र्मंत्रिभिः सार्धं गिरिमूर्द्धनि निवसति २१ भ्राता कनीयान्सुग्रीवो वालिनः पाप २
चेतसः तेन निष्कासितो भार्या हृता तस्य हवालिना २२ तद्भयादृष्यमूका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ख्यंगिरिमाश्रित्यसंस्थितः अहंसुग्रीवसचिवोवायुपुत्रोमहामते २३ हनू
मान्नामविख्यातोह्यंजनीगर्भसंभवः तेनसख्यंत्वयायुक्तंसुग्रीवेणरघूत्तम
२४ भार्यापहारिणंहंतुंसहायस्तेभविष्यति इदानीमेवगच्छामआगच्छयदि
रोचते २५ श्रीरामउवाच अहमप्यागतस्तेनसख्यंकर्तुंकपीश्वर सख्युस्त
स्यापियत्कार्यंतत्करिष्याम्यसंशयं २६ हनूमान्स्वस्वरूपेणास्थितोराममथाब्र
वीत् आरोहतांममस्कंधौगच्छामः पर्वतोपरि २७ यत्रतिष्ठतिसुग्रीवोभं
त्रिभिर्वालिनोभयात् तथेतितस्यारुरोहस्कंधंरामोथलक्ष्मणः २८ उत्पपा
तगिरेर्मूर्ध्नि क्षणादेवमहाकपिः वृक्षच्छायांसमाश्रित्यस्थितौतौरामलक्ष्म
णौ २९ हनूमानपिसुग्रीवमुपगम्यकृतांजलिः व्येतुतेभयमायातौराजन्श्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰कि॰१

२

रामलक्ष्मणौ ३० ग्रीप्रमुनिश्चरामेणसख्यंतेयोजितंमया अग्निंसाक्षिणंमा
रोप्यतेनसख्यंद्रुतंकुरु ३१ ततोतिहर्षात्सुग्रीवःसमागम्यरघूत्तमं वृक्षशाखां
स्वयंछित्वाविष्टरायददौमुदा ३२ हनूमान्लक्ष्मणायादात्सुग्रीवायचलक्ष्म
णः हर्षेणमहताविष्टाःसर्वएवावतस्थिरे ३३ लक्ष्मणस्त्वब्रवीत्सर्वंरामवृत्तां
तमादितः वनवासाभिगमनंसीताहरणमेवच ३४ लक्ष्मणोक्तंवचःश्रुत्वासु
ग्रीवोराममब्रवीत् अहंकरिष्येराजेंद्रसीतायाःपरिमार्गणं ३५ सहायमपिते
रामकरिष्येशत्रुघातिनः शृणुराममयादृष्टंकिंचिन्नेकथयाम्यहं ३६ एक
दामंत्रिभिःसार्धंस्थितोहंगिरिमूर्धनि विहायसानीयमानांकेनचित्प्रमदोत्त
मां ३७ क्रोशंतींरामरामेतिदृष्ट्वास्मान्पर्वतोपरि आमुच्याभरणान्याशु २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वोत्तरीयेणभामिनी ३८ निरीक्ष्याधःपरित्यज्यक्रोशंतीतेनरक्षसा नीताऽ
हंभूषणान्यास्मिगुहायामक्षिपंप्रभो ३९ इदानीमपिपश्यत्वंजानीहितववान
वा इत्युक्त्वाऽनीयरामायदर्शयामासवानरः ४१ विमुच्यरामस्तद्दृष्ट्वाहासी
तेतिमुहुर्मुहुः हृदिनिक्षिप्यतत्सर्वंरुरोदप्राकृतोयथा ४२ आश्वास्यराघवं
भ्रातालक्ष्मणोवाक्यमब्रवीत् अचिरेणैवतेरामप्राप्यतेजानकीशुभा ४३ वा
नरेंद्रसहायेनहत्वारावणमाहवे सुग्रीवोप्याहहेरामप्रतिज्ञांकरवाणिते ४४
समरेरावणंहत्वातवदास्यामिजानकीं ततोहनूमान्प्रज्वाल्यतयोरग्निंसमीपतः।
।तावुभौरामसुग्रीवावग्नौसाक्षिणितिष्ठति ४६ बाहूप्रसार्यचालिंग्यपरस्पर
मकल्मषौ समीपेरघुनाथस्यसुग्रीवःसमुपाविशत् ४७ स्वोदंतंकथयामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सप्रणयाद्रघुनार्यके सखेभ्रणुममोदंतं वालिनायत्कृतंपुरा ४८ मयपुत्रोथमा
यावीनाम्नापरमदुर्मदः किष्किंधांसमुपागम्यवालिनंसमुपाव्हयत् ४९ सिंहना
देनमहतावालीतुनदमर्षणः निर्ययौक्रोधताम्राक्षोजघानदृढमुष्टिना ५०
दुद्राववेतेनसंविग्नोजगामस्वगुहांप्रति ५१ अनुदुद्राववेवालीमायाविनम
हंतथा ततःप्रविष्टमालोक्यगुहांमायाविनंरुषा ५२ वालीमामाहतिष्टत्वंब
हिर्गछाम्यहंगुहां इत्युक्त्वाविश्यसगुहांमासमेकंननिर्ययौ ५३ मासादूर्ध्वं
गुहाद्वारान्निर्गतंरुधिरंबहु नदृष्ट्वापरितप्तांगोमृतोवालीतिदुःखितः
५४ । गुहाद्वारिशिलामेकांनिधायगृहमागतः ततोब्रुवंमतोवालीगुहायां
रक्षसाहतः ५५ नब्रुत्वादुःखितात्ताःसर्वेमाममनिछंतमप्युत राज्याभिषेचनेच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रुः सर्वैर्वानरमंत्रिणः ५६ शिष्टं तदा मया राज्यं किंचित्कालमरिंदम ततः समा
गतो वाली मामाह परुषं रुषा ५७ बहुधा भर्त्सयित्वा मां निजघान च मुष्टिभिः
॥ ततो निर्गत्य नगराद्धावं परया भिया ५८ लोकान्सर्वान्परिक्रम्य ऋष्यमू
कमुपाश्रितः ऋषेः शापभयात्सोपि नायाती मं गिरिं प्रभो ५९ तदादि मम भा
र्यां स स्वयं भुंक्ते विमूढधीः अतो दुःखेन संतप्तो हृतदारो हृताश्रयः ६० वसा
म्यद्य भवत्पादसंस्पर्शात्सुखितोस्म्यहं मित्रदुःखेन संतप्तो रामो राजीवलोच
नः ६१ हनिष्यामि तव द्वेष्यं शीघ्रं भार्यापहारिणं इति प्रतिज्ञामकरोत्सुग्रीवस्य
पुरस्तदा ६२ सुग्रीवोप्याह राजेंद्र वाली बलवतां बली कथं हनिष्यति भवान्
देवैरपि दुरासदं ६३ शृणु ते कथयिष्यामि तद्बलं बलिनां वर कदाचिद्दुंदुभि
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰कि॰१ र्नाममहाकायोमहाबलः ६४ किष्किंधामगमद्राममहामहिषरूपधृ
५ क् युद्धायवालिनंरात्रौसमाव्हयतभीषणः ६५ तंश्रुत्वाऽसहमानोसौ
वालीपरमकोपनः महिषंश्रृंगयोर्धृत्वापातयामासभूतले ६६ पादे
नैकेनतत्कायमाक्रम्यास्यशिरोमहत् हस्ताभ्यांभ्रामयंश्छित्वातोलयि
त्वाक्षिपद्भुवि ६७ पपाततच्छिरोराममातंगाश्रमसन्निधौ योजना
त्पतितंतस्मान्मुनेराश्रममंडले ६८ रक्तवृष्टिःपपातोच्चैर्दृष्ट्वातांक्रोध
मूर्छितः मातंगोवालिनंप्राहयद्यागंतासिमेगिरिं ६९ इतःपरंभग्न
शिरामरिष्यसिनसंशयः एवंशप्तस्तदारभ्यऋष्यमूकंनयात्यसौ ७० ५
एतज्ज्ञात्वाहमप्यत्रवसामिभयवर्जितः रामपश्यशिरस्तस्यदुंदुभेः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पर्वतोपमं ७१ तत्क्षेपणे यदा शक्तः शक्तस्त्वं वालिनो वधे इत्युक्त्वा
दर्शयामास तच्छिरस्तद्गिरिसंनिभं ७२ दृष्ट्वा रामः स्मितं कृत्वा पादांगुष्ठे
नचाक्षिपत् दशयोजनपर्यंतं तदद्भुतमिवाभवत् ७३ साधुसाध्विति
सप्राह सुग्रीवो मंत्रिभिः सह पुनरप्याह सुग्रीवो रामं भक्तपरायणं ७४
एते तालामहासाराः सप्त पश्य रघूत्तम एकैकं चालयित्वा सौ निष्पत्रा
न्कुरुते जसा ७५ यदि त्वमेकबाणेन विध्वा छिद्रं करोषि चेत् हत
स्त्वया तदा वाली विश्वासो मे प्रजायते तथेति धनुरादाय सायकं तत्र सं
दधे ७६ बिभेद च तदा रामः सप्त तालान्महाबलः तालान्सप्त विनि
र्भिद्य गिरिं भूमिं च सायकः ७७ पुनरागत्य रामस्य तूणीरे पूर्ववत्स्थि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः ततोतिहर्षात्सुग्रीवोराममाहातिविस्मितः ७८ देवत्वंजगतांना
थः परमात्मा न संशयः मत्पूर्वकृतपुण्यौघैः संगतोऽद्यमयासह ७९
त्वांभजंतिमहात्मानः संसारविनिवृत्तये त्वांप्राप्यमोक्षसचिवंप्रार्थयेऽहंक
थंभवं ८० दाराःपुत्राधनंराज्यंसर्वंत्वन्माययाकृतं अतोहंदेवदेवेश
नाकांक्षेन्यत्प्रसीदमे ८१ आनंदानुभवंत्वाद्यप्राप्तोहंभाग्यगौरवात्
मृदर्थेयतमानेननिधानमिवसत्यते ८२ अनाद्यविद्यासंसिद्धंबंध
नंछिन्नमद्यनः यज्ञदानतपःकर्मपूर्त्तेष्टादिभिरप्यसौ ८३ नजीर्यते
पुनर्दार्ढ्यंभजतेसंसृतिप्रभो त्वत्पाद्दर्शनात्सद्योनाशमेतिनसंशयः ८४
क्षणार्धमपियच्चित्तंत्वयितिष्ठत्यचंचलं नस्याज्ञानमनर्थानांमूलंनश्य

यथाधनराशिःप्राप्तोभवति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३ दारसुखादिकं

ति तत्क्षणात् ९५ न तिष्ठतु मनो राम त्वयि नान्यत्र मे सदा ९६ राम रामेति
यद्वाणी मधुरं गायति क्षणं स ब्रह्महा सुरापो वा मुच्यते सर्वपातकैः ९७ न
यं कांक्षे विज राम न च दारासुखादिकं भक्तिमेव सदा कांक्षे त्वयि बंधविमोचनीं
९८ त्वन्मायाकृतसंसारस्त्वदंशोहं रघूत्तम स्वपादभक्तिमादिश्य त्राहि मां
भवसंकटात् ९९ पूर्वं मित्रार्युदासीनास्त्वन्मायावृतचेतसः आसन्मेद्य भव
त्पाददर्शनादेव राघव ९० सर्वं ब्रह्मैव मे भाति क्व मित्रं क्व च मे रिपुः यावत्त्वन्मा
यया बद्धस्तावद्गुणविशेषता ९१ मायावदस्ति नानात्वं तावद्भवति नान्यथा ।
यावन्नानात्वमज्ञानात्तावत्कालकृतं भयं ९२ अतोविद्यामुपासन्ते यः सोंधे तम
सि मज्जति मायामूलमिदं सर्वं पुत्रदारादिबंधनं अतो त्सारयमायां त्वं दासींत

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ कि॰ १ वरघूत्तम ९३ त्वत्पादपद्मार्पितचित्तवृत्तिस्त्वन्नामसंगीतकथासुवाणी त्वद्भ
७ क्तसेवानिरतौ करौ मे त्वदंगसंगं लभतां मदंगं ९४ त्वन्मूर्त्तिभक्तान्स्वगुरूंश्च चक्षुः
पश्यत्वजस्रं स शृणोतु कर्णः त्वज्जन्मकर्माणि च पादयुग्मं व्रजत्वजस्रं तव मंदिरा
णि ९५ अंगानि ते पादरजोविमिश्रतीर्थानि बिभ्रंतु हि शत्रुकेतो शिरस्त्वदीयं
भवपद्मजाद्यैर्जुष्टं पदं राम नमत्वजस्रं ९६ ॥इति श्रीमदध्यात्मरामायणे
उमामहेश्वरसंवादे किष्किंधाकांडे प्रथमः सर्गः १ श्रीमहादेव उवाच इत्थं
स्वात्मपरिष्वंगनिर्धूताशेषकल्मषं रामः सुग्रीवमालोक्य सस्मितं वाक्यमब्रवी
त् १ मायां मोहकरीं तस्मिन्वितन्वन्कार्यसिद्धये सखे त्वदुक्तं यत्तन्मास ७
त्यमेव न संशयः २ किंतु लोका वदिष्यंति मामेवं रघुनंदनः हतवान्किंक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पींद्राय सख्यंकृत्वाग्निसाक्षिकं ३ इतिलोकापवादोमेभविष्यतिनसंशयः
तस्मादाव्हयभद्रंतेगत्वायुद्धायवालिनं ४ बाणेनैकेनतंहत्वाराज्येत्वामभि
षिंचये तथेतिगत्वासुग्रीवः किष्किंधोपवनेद्रुतं ५ कृत्वाशब्दंमहानादंतमा
व्हयतवालिनं तछ्रुत्वाभ्रातृनिनदं रोषताम्रविलोचनः ६ निर्जगामगृहाच्छी
घ्रंसुग्रीवोयत्रवानरः तमापतंतंसुग्रीवः शीघ्रंवक्षस्यताडयत् ७ सुग्रीवमपि
मुष्टिभ्यांजघानक्रोधमूर्छितः वालीनमपिसुग्रीवएवंक्रुद्धौपरस्परं ८ अयुध्ये
तामेकरूपौदृष्ट्वारामोऽतिविस्मितः नमुमोचतदाबाणंसुग्रीववधशंकया ९
- ततोदुद्रावसुग्रीवोवमन्रक्तंभयाकुलः वालीस्वभवनंयातः सुग्रीवोराममब्रवी
त् १० किंमांघातयसेरामशत्रुणाभ्रातृरूपिणा यदिमद्धननेवांछात्वमेव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ कि॰ २ न्नहिमांविभो ११ एवंमेप्रत्ययंकृत्वासत्यवादिन्‌रघूत्तम उपेक्षसेकिमर्थंमांश

८ रणागतवत्सल १२ श्रुत्वासुग्रीववचनंरामःसाश्रुविलोचनः आलिंग्यमास्म

नैषीस्त्वंदृष्ट्वावामेकरूपिणौ १३ मित्रघातित्वमाशंक्यमुक्तवान्सायकंनहि इदा

नीमेवतेचिन्हंकरिष्येभ्रमशांतये १४ गत्वाह्वयपुनःशत्रुंहतंद्रक्ष्यसिवालिनं

रामोहंत्वांशपेभ्रातर्हनिष्यामिरिपुंक्षणात्‌ १५ इत्याश्वास्यससुग्रीवंरामोलक्ष्म

णमब्रवीत्‌ सुग्रीवस्यगलेपुष्पमालामामुच्यभूषितां १६ प्रेषयस्वमहाभागंसुग्री

वंवालिनंप्रति लक्ष्मणस्तुतदाबध्वागच्छगच्छेतिसादरं १७ प्रेषयामाससुग्री

वंसोपिगत्वातथाकरोत्‌ पुनरप्यद्भुतंशब्दंकृत्वावालिनमाह्वयत्‌ १८ तच्छ्रुत्वा ८

विस्मितोवालीक्रोधेनमहतावृतः बध्वापरिकरंसम्यक्‌गमनायोपचक्रमे १९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गछंतंवालिनंताराग्रहीत्वानिषिषेधतं नगंतव्यंत्वयेदानींशंकामेतीवजायते
२० इदानीमेवतेभग्नःपुनरायासिसत्वरः सहायोबलवान्तस्यकश्चिन्नूनंस
मागतः २१ वालीतामाहहेसुभ्रुशंकात्तेव्येतुनद्रुता प्रियेकरंपरित्यज्यगछ
गछामितंरिपुं २२ हत्वाशीघ्रंसमायास्येसहायस्तस्यकोभवेत् सहायोयदिसुग्री
वस्ततोहत्वोभयंक्षणात् २३ आयास्येमाशुचःशूरःकथंतिष्ठेद्गृहेरिपुं ज्ञात्वाः
प्याव्हयमानंहिहत्वायास्यामिसुंदरि २४ तारोवाच मत्तोन्यच्छृणुराजेंद्रश्रुत्वा
कुरुयथोचितं आहमामंगदःपुत्रोमृगयायांश्रुतंवचः २५ अयोध्याधिपतिः
श्रीमान्रामोदाशरथिःकिल लक्ष्मणेनसहभ्रात्रासीतयाभार्ययासह २६ आग
तोदंडकारण्यंतत्रसीताहृताकिल रावणेनसहभ्रात्रामार्गमाणोथजानकीं २७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त॰ न
रा॰ कि॰ २ आगतोऋष्यमूकाद्रिंसुग्रीवेणसमागतः चकारतेनसुग्रीवःसख्यंवौलसाक्षिकं
९ २८ प्रतिज्ञांकृतवान्रामःसुग्रीवायसलक्ष्मणः वालिनंसमरेहत्वाराजानंत्वां
करोम्यहं २९ इतिनिश्चित्यतौयातौनिश्चितंशृणुमेवचः इदानीमेवतेभग्नः
कथंपुनरुपागतः ३० अतस्त्वंसर्वथावैरंत्यक्त्वासुग्रीवमानय यौवराज्येऽभिषिं
चाशुरामंतंशरणंव्रज ३१ पाहिमामंगदंराज्यंकुलंचहरिपुंगव इत्युक्त्वा
श्रुमुखीतारापादयोःप्रणिपत्यतं ३२ हस्ताभ्यांचरणौधृत्वारुरोदभयविह्वला।
तामालिंग्यतदावालीसस्नेहमिदमब्रवीत् ३३ स्त्रीस्वभावाद्बिभेषित्वंप्रियेना
स्तिभयंमम रामोयदिसमायातोलक्ष्मणेनसमंप्रभुः ३४ तदारामेणमेस्ने ९
होभविष्यतिनसंशयः रामोनारायणःसाक्षादवतीर्णोऽखिलप्रभुः ३५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भूभारहरणार्थायश्रुतंपूर्वंमयानघे स्वपक्षःपरपक्षोवानास्तितस्यपरात्मनः
३६ आनेष्यामिगृहंसाध्विनत्वातच्चरणांबुजं भजतोनुभजत्येषभक्तिगम्यः
सुरेश्वरः ३७ यदिस्वयंसमायातिसुग्रीवोहन्मितंक्षणात् यदुक्तंयौवराज्या
यसुग्रीवस्याभिषेचनं ३८ कथमाहूयमानोहंयुद्धायरिपुणाप्रिये शूरोहंस
र्वलोकानां संमतःशुभलक्षणे ३९ भीतभीतमिदंवाक्यंकथंवालीवदेत्स्त्रिये
तस्माच्छोकंपरित्यज्यतिष्ठसुंदरिवेश्मनि ४० एवमाश्वास्यतारांतांशोचंतीम
श्रुलोचनां गतोवालीसमुद्युक्तःसुग्रीवस्यवधायसः ४१ दृष्ट्वावालिनमा
यांतंसुग्रीवोभीमविक्रमः उत्पपातगलेबद्धपुष्पमालस्नतंगवत् ४२ मुष्टिभ्यां
ताडयामासवालिनंसोपितंतथा अहन्वालीचसुग्रीवंसुग्रीवोवालिनंतथा
४३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रामंविलोकयन्नेवसुग्रीवोयुयुधेयुधि इत्येवंयुध्यमानौतौदृष्ट्वारामःप्रतापवान्
४४ बाणमादायतूणीराद्दृढे धनुषिसंदधे आकृष्याकर्णपर्यंतमदृश्योवृक्ष
खंडगः ४५ निरीक्ष्यवालिनंसम्यग्लक्ष्येणहृदयेहरिः उत्ससर्जाशनिसमंम
हावेगंमहाबलः ४६ बिभेदसशरोवक्षोवालिनःकंपयन्महीं उत्पपातमहाशब्दं
मुंचन्सन्निपपातह तदामुहूर्त्तंनिःसंज्ञोभूत्वाचेतनमापसः ४७ ततोवालीद
दर्शाग्रेरामंराजीवलोचनं धनुरालंब्यवामेनहस्तेनान्येनसायकं ४८ बिभ्राणं
चीरवसनंजटामुकुटधारिणं विशालवक्षसंभ्राजद्वनमालाविभूषितं ४९ पीन
चार्वायतभुजंनवदूर्वादलच्छविं सुग्रीवलक्ष्मणाभ्यांचपार्श्वयोःपरिसेवितं ५०
विलोक्यशनैःप्राहवालीरामंविगर्हयन् किंमयापकृतंरामतवयेनहतोस्म्यहं
५१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राजधर्ममविज्ञाय गर्हितं कर्म ते कृतं वृक्षखंडे तिरोभूत्वा त्यजता मयि सायकं ५२
यशः किं लप्स्यसे राम चोरवत्कृतसंगरः पदिक्षत्रियदायादो यो मनोर्वंशसमुद्भवः
५३ युद्धं कृत्वा समक्षं मे प्राप्स्यसे त्वत्फलं तदा सुग्रीवेण कृतं किं ते मया वा न कृतं
किमु ५४ रावणेन हृता भार्या तव राम महावने सुग्रीवं शरणं यातस्तदर्थमिति शु
श्रुम ५५ बत राम न जानीषे मद्बलं लोकविश्रुतं रावणं सकुलं बध्वा ससी
तं लंकया सह ५६ आनयामि मुहूर्त्तार्धाद्यदि त्वं वेत्सि राघव धर्मिष्ठ इति
लोकेस्मिन् कथ्यसे रघुनंदन ५७ वानरं व्याध वद्धत्वा धर्मं कं लप्स्यसे वद
अभक्ष्यं वानरं मांसं हत्वा मां किं करिष्यसि ५८ इत्येवं बहु भाषं तं वालिनं राघ
वोऽब्रवीत् धर्मस्य गोप्ता लोकेऽस्मिंश्चरामि सशरासनः ५९ अधर्मकारिणं

रा॰कि॰२ हत्वासध्नुर्मे पालयाम्पहं दुहितांभगिनीभ्रातुर्भार्याचैवतथास्नुषा ६० समांयो
११ रमतेतासामेकामपिविमूढधीः पातकीसतुविज्ञेयःसवध्योराजभिःसदा ६१
त्वंतुभ्रातुःकनिष्ठस्यभार्यायांरमसेबलात् अतोमयाधर्मविदाहतोसिवनगो
चर ६२ त्वंकपित्वान्नजानीषिमहांतोविचरंतिये न लोकंपुनानाःसंचारैरत
स्तान्नातिभाषयेत् ६२ तच्छ्रुत्वाभयसंत्रस्तोज्ञात्वारामंरमापतिं वालीप्रण
म्यरभसाद्रामंवचनमब्रवीत् ६४ रामरामहाभागजानेत्वांपरमेश्वरं अ
जानतामयाकिंचिदुक्तंतत्क्षंतुमर्हसि ६५ साक्षात्वच्छरघातेनविशेषेणतवा
ग्रतः त्यजाम्यसून्महायोगिदुर्लभंतवदर्शनं ६६ यन्नामविवशोगृण्हन् ११
म्रियमाणःपरंपदं यातिसाक्षात्सएवाद्यममुमूर्षोर्मेपुरःस्थितः ६७ देवजा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नामिपुरुषं त्वां श्रियं जानकीं प्रभुं। रावणस्य वधार्थाय जातं त्वां ब्रह्मणार्थितं॥
६८ अनुजानीहि मां राम यानं त्वत्पदमुत्तमं मम तुल्यबले बाले अंगदे त्वं द
यां कुरु ६९ विशल्यं कुरु मे राम हृदयं पाणिना स्पृशन् तथेति बाणमुद्धृत्य
रामः पस्पर्श पाणिना ७० त्यक्त्वा तद्वानरं देहममरेंद्रोऽभवत्क्षणात् ७०
वाली रघूत्तमशरान्निहतो विमृष्टो रामेण शीतलकरेण सुखाकरेण सद्यो वि
मुच्य कपिदेहमनन्यलभ्यं प्राप्तः पदं परमहंसगणैर्दुरापं ७१ इतिश्रीमद
ध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधाकांडे द्वितीयः सर्गः २ ॥ ॥
श्रीमहादेव उ० निहते वालिनि रणे रामेण परमात्मना दुद्रुवुर्वानराः सर्वे कि
ष्किंधां भयविह्वलाः १ तारामूचुर्महाभागे हतो वाली रणाजिरे अंगदं परि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थ
रा॰कि॰२ रक्षाद्यं मंत्रिणः परिनोदय २ चतुर्द्वारकपाटादीन् बध्वा रक्षामहे पुरीं वान
१२ राणां तु राजानमंगदं कुरु नामिनि ३ निहतं वालिनं श्रुत्वा तारा शोकविमूर्छि
ता अताडयत्स्वपाणिभ्यां शिरो वक्षश्च भूरिशः ४ किमंगदेन राज्येन नग
रेण धनेन वा इदानीमेव निधनं यास्यामि पतिना सह ५ इत्युक्त्वा त्वरितानात
त्र रुदंती मुक्तमूर्धजा ययौ तारातिशोकार्त्ता यत्र भर्तृकलेवरं ६ पतितं वालि
नं दृष्ट्वा रक्तैः पांसुभिरावृतं रुदंती नाथ नाथेति पतिता तस्य पादयोः ७ करुणं
विलपंती सा ददर्श रघुनंदनं राम मां जहि बाणेन येन वाली हतस्त्वया ८ ग
च्छामि पतिसालोक्यं पतिर्मामभिकांक्षते स्वर्गेपि न सुखं तस्य मां विना रघुनंद १२
न ९ पत्नीवियोगजं दुःखमनुभूतं त्वयानघ वालिने मां प्रयच्छाशु पत्नीदान

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वालिनेतिशेषः
फलंभवेत् १० सुग्रीवत्वंसुखंराज्यं दापितंवालिघातिना रामेणरुमयासार्धं भुं
क्ष्वसापत्न्यवर्जितं ११ इत्येवंविलपंतींतां तारां रामो महामनाः सांत्वयामास
दययातत्वज्ञानोपदेशतः १२ किंभीरुशोचसिव्यर्थं शोकस्याऽविषयंपतिं प
तिंत्वंयंदेहंवाजीवंवावदतत्वतः १३ पंचात्मकोजडोदेहस्त्वङ्मांसरुधिरा
स्थिमान् कालकर्मगुणोत्पन्नः सोप्याऽस्तेऽद्यापितेपुरः १४ मन्यसेजीवमा
त्मानंजीवस्तर्हिनिरामयः नजायतेनम्रियतेनतिष्ठतिनगच्छति १५ नस्त्रीपु
मान्वाषंढोवाजीवः सर्वगतोव्ययः एकएवाद्वितीयोयमाकाशवदलेपकः नित्यो
ज्ञानमयःशुद्धःसकथंशोकमर्हति १६ तारोवाच देहोऽचित्काष्ठवद्रामजी
वोनित्यश्चिदात्मकः सुखदुःखादिसंबंधः कस्यस्याद्राममेवद १७ श्रीरामउवाच
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ए॰कि॰३ अहंकारादिसंबंधो यावद्देहेंद्रियैः सह संसारस्तावदेव स्यादात्मनस्त्वविवेकिनः
१२ १८ मिथ्यारोपितसंसारो न स्वयं विनिवर्त्तते विषयान्ध्यायमानस्य स्वप्ने मिथ्या
गमो यथा १९ अनाद्यविद्यासंबंधात्तत्कार्याहंकृतेस्तथा संसारोऽपार्थकोऽपि स्या
द्रागद्वेषादिसंकुलः २० मन एव हि संसारो बंधश्चैव मनः शुभे आत्मा मनः स
मानत्वमेत्य तत्कृतबंधभाक् २१ यथा विशुद्धः स्फटिकोऽलक्तकादिसमीपगः न
तद्वर्णयुतो भाति वस्तुतो नास्ति रंजना २२ बुद्धींद्रियादिसामीप्यादात्मनः संस
तिर्बलात् आत्मा स्वलिंगं तु मनः परिगृह्य तदुद्भवान् २३ कामान्जुषन् गुणै
र्बद्धः संसारे वर्त्तते वशः आदौ मनोगुणान्सृष्ट्वा ततः कर्माण्यनेकधा २४ शुक्ल
लोहितकृष्णानि ग[?]तयस्तत्समानतः एवं कर्मवशाज्जीवो भ्रमत्याभूतसंप्लु १२

गतीरित्यर्थः

वं २५ सर्वोपसंहृतौ जीवो वासनाभिः स्वकर्मभिः अनाद्यविद्यावशगस्तिष्ठत्य्
अंतःकरणादितादात्म्याध्यासात् भिनिवेशतः २६ सृष्टिकाले पुनः पूर्ववासनामानसैः सह जायते पुनरप्येवं घटि वासनाश्रयमानसानि कर्माणि चैतैः
यंत्रमिवावशः २७ यदा पुण्यविशेषेण लभते संगतिं सतां मद्भक्तानां सुशां
तानां तदा मद्विषया मतिः २८ मत्कथाश्रवणे श्रद्धा दुर्लभा जायते ततः ततः स्व
रूपविज्ञानमनायासेन जायते २९ तदाचार्यप्रसादेन वाक्यार्थज्ञानतः क्षणात्
देहेंद्रियमनःप्राणाहंकृतिभ्यः पृथक्स्थितं ३० स्वात्मानुभवतः सत्यमानंदा
त्मानमद्वयं ज्ञात्वा सद्यो भवेन्मुक्तः सत्यमेव मयोदितं ३१ एवं मयोदितं सम्य
गालोचयति यो निशं तस्य संसारदुःखानि न स्पृशंति कदाचन ३२ त्वमप्येत
न्मया प्रोक्तमालोचय विशुद्धधीः न स्पृश्यसे दुःखजालैः कर्मबंधाद्विमोक्ष्यसे
३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰कि॰ २ पूर्वजन्मनितेसुभ्रु कृतामद्भक्तिरुत्तमा अतस्तवविमोक्षायरूपंमेदर्शितंशुभे॥
१४ ३४ ध्यात्वामद्रूपमनिशमालोच्यमयोदितं प्रवाहपतितंकार्यंकुर्वत्यपिनलि
प्यसे ३५ श्रीरामेणोदितंसर्वंश्रुत्वातारातिविस्मिता देहाभिमानजंशोकंत्य
क्त्वानत्वारघूत्तमं ३६ आत्मानुभवसंतुष्टाजीवन्मुक्ताबभूवह क्षणसंगम
मात्रेणरामेणपरमात्मना ३७ अनादिबंधंनिर्धूयमुक्तासापिविकल्मषा
सुग्रीवोपिचतच्छ्रुत्वारामवक्त्रात्समीरितं ३८ जहावज्ञानमखिलंस्वस्थचित्तो
भवत्तदा ततःसुग्रीवमाहेदंरामोवानरपुंगवं ३९ भ्रातुर्ज्येष्ठस्यपुत्रेणयद्युक्तं
पारलौकिकयुक्तं सांपरायिकं कुरुसर्वंयथान्यायंसंस्कारादिममाज्ञया ४० तथेतिबलिभिर्मु १४
ख्यैर्वानरैःपरिणीयतं वालिनंपुष्पकेक्षिप्वासर्वराजोपचारकैः ४१ भेरीदुंदु
उत्थाप्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिनिषेचितैर्ब्राह्मणैर्मंत्रिभिः सह यूथपैर्वानरैः पौरैस्ताराया चांगदेन च ४२
गत्वा चकार तत्सर्वं यथान्यायं प्रयत्नतः स्नात्वा जगाम रामस्य समीपं मंत्रि
भिः सह ४३ नत्वा रामस्य चरणौ सुग्रीवः प्राह हृष्टधीः राज्यं प्रशाधि राजेंद्र
वानराणां समृद्धिमत् ४४ दासोहं ते पादपद्मं सेवे लक्ष्मणवच्चिरं इत्युक्तो रा
घवः प्राह सुग्रीवं सस्मितं वचः ४५ त्वमेवाहं न संदेहः शीघ्रं गच्छ ममाज्ञया।
पुरराज्याधिपत्ये त्वं स्वात्मानमभिषेचय ४६ नगरं न प्रवेक्ष्यामि चतुर्दश
समाः सखे आगमिष्यति मे भ्राता लक्ष्मणः पत्तनं तव ४७ अंगदं यौवराज्ये
त्वमभिषेचय सादरं अहं समीपे शिखरे पर्वतस्य सहानुजः ४८ वत्स्यामि
वर्षदिवसान् तत्र त्वं यत्नवान् भव किंचित्कालं पुरे स्थित्वा सीतायाः परिमार्ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰कि॰२ ये ४९ साष्टंगं प्रणिपत्याह सुग्रीवो रामपादयोः यदाज्ञापयसे देव तत्तथैव क
१५ रोम्यहं ५० अनुज्ञातस्तु रामेण सुग्रीवस्तु सलक्ष्मणः गत्वा पुरीं तथा चक्रे यथा
रामेण चोदितः ५१ सुग्रीवेण यथान्यायं पूजितो लक्ष्मणस्तदा आगत्य राघ
वं शीघ्रं प्रणिपत्योपतस्थिवान् ५२ ततो रामो जगामाशु लक्ष्मणेन समन्वितः
॥ प्रवर्षणगिरेरूर्ध्वं शिखरं भूरिविस्तरं ५३ तत्रैकं गह्वरं दृष्ट्वा स्फाटिकं दी
प्तिमच्छुभं वर्षवातातपसहं फलमूलसमीपगं वासाय रोचयामास तत्र रा
मः सलक्ष्मणः ५४ दिव्यमूलफलपुष्पसंयुते मौक्तिकोपमजलौघपल्वले॥
चित्रवर्णमृगपक्षिशोभिते पर्वते रघुकुलोत्तमोवसत् ५५ इति श्री १५
मदध्यात्मरामायणे किष्किंधाकांडे तृतीयः सर्गः ३ श्रीमहादेवउवा॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

३-आहितसुकांचन्यः कक्षाः प्रस्तरणानि येषां तान्

तत्रवार्षिकदिनानि राघवो लीलया मणिगुहासु संचरन् पक्वमूलफलभोग
तोषितो लक्ष्मणेन सहितो वसत्सुखं १ गातनुन्नजलपूरितमेघानंतरस्तनि
तवेघुतगर्भान् वीक्ष्य विस्मयमगाद्गजयूथान्यद्रदाँहितसुकांचनकक्षान् २
नवघासंसमास्वाद्य हृष्टपुष्टमृगद्विजाः धावंतः परितो रामं वीक्ष्य विस्फारितेक्ष
णाः ३ नचलंति सदा ध्याननिष्ठा इव मुनीश्वराः रामं मानुषरूपेण गिरिकानन
भूमिषु ४ चरंतं परमात्मानं ज्ञात्वा सिद्धगणा भुवि मृगपक्षिगणा भूत्वा रा
ममेवानुसेविरे ५ सौमित्रिरेकदा राममेकांते ध्याननतत्परं समाधिविरमे
नेक्ष्याप्रणयाद्विनयान्वितः ६ अब्रवीद्देव ते वाक्यात्पूर्वोक्ताद्विगतो मम
अनाद्यविद्यासंभूतः संशयो हृदि संस्थितः ७ इदानीं श्रोतुमिच्छामि क्रिया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा·कि·४ मार्गेणराघव त्वदाराधनंलोके यथाकुर्वंतियोगिनः ८ इदमेवसदाप्राहु
१६ र्योगिनोमुक्तिसाधनं नारदोपितथाव्यासोब्रह्माकमलसंभवः ९ ब्रह्मक्ष
त्रादिवर्णानामाश्रमाणांचमोक्षदं स्त्रीशूद्राणांचराजेंद्रसुलभंमुक्तिसाधनं॥
तवभक्तायमेभ्रात्रेब्रूहिलोकोपकारकं १० श्रीरामउवाच मम पूजाविधानस्य
नांतोस्तिरघुनंदन तथापिवक्ष्येसंक्षेपाद्यथावदनुपूर्वशः ११ स्वगृह्योक्तप्र
कारेणद्विजत्वंप्राप्यमानवः सकाशात्सद्गुरोर्मंत्रंलब्ध्वामद्भक्तिसंयुतः १२
तेनसंदर्शितविधिर्मामेवाराधयेत्सुधीः हृदयेवानलेवार्चेत्प्रतिमादौविभा
वसौ १३ शालग्रामशिलायांवापूजयेन्मामतंद्रितः प्रातःस्नानंप्रकुर्वीतप्रथ १६
मंदेहशुद्धये १४ वेदतंत्रोदितैर्मंत्रैर्मृल्लेपनविधानतः संध्यादिकर्मयन्नित्यं

द्विजो वेदोदितैः शूद्रादिस्तंत्रोदितैः।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्कुर्याद्विधिनाबुधः १५ संकल्पमादौकुर्वीत सिध्यर्थं कर्मणांसुधीः स्वगुरुंपू
जयेद्भक्त्या मद्बुध्यापूजकोमम १६ शिलायांस्नपनंकुर्यात्प्रतिमासुप्रमार्जनं॥
॥प्रसिद्धैर्गंधपुष्पाद्यैर्मत्पूजासिद्धिदायिका १७ अमायिकोनुवृत्त्यामांपू गुरूपदिष्टमार्गानुवर्त्तिनेन
प्रतिमाश्चेतआदयश्च जयेन्नियतव्रतः प्रतिमादिष्वलंकारः प्रियोमेकुलनंदन १८ अग्नौयजेत
हविषाभास्करेस्थंडिलेयजेत् भक्तेनोपहृतंप्रीत्यैश्रद्धयाममवार्यपि १९ किं
पुनर्भक्ष्यभोज्यादिगंधपुष्पाक्षतादिकं पूजाद्रव्याणिसर्वाणिसंपाद्यैवस
मारभेत् २० चैलाजिनकुशैःसम्यगासनंपरिकल्पयेत् तत्रोपविश्यदेव
स्यसंमुखेशुद्धमानसः २१ ततोन्यासंप्रकुर्वीत मातृकांबहिरांतरं कृत्वावा
दिततः कुर्यात्तत्वन्यासंततःपरं २२ मन्मूर्त्तिपंजरन्यासंमंत्रन्यासंततोन्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वापयेदितिशेषः

रा॰ कि॰ ५ सेत् प्रतिमादावपि तथा कुर्यान्नित्यमतंद्रितः २३ कलशं स्वपुरो वामे क्षिपेत् तुष्यादि दक्षिणे स्वापयेदित्यर्थः
१७ तुष्यादि दक्षिणे अर्घ्यपाद्यप्रदानार्थं मधुपर्कार्थमेव च २४ तथैवाचमना
र्थं तु न्यसेत्पात्रचतुष्टयं हृत्पद्मे भानुविमलां मत्कलां जीवसंज्ञितां २५ ध्यायेत्स्व
देहमखिलं तया व्याप्तमरिंदम तामेवावाहयेन्नित्यं प्रतिमादिषु मत्कलां
२६ पाद्यार्घ्याचमनीयाद्यैः स्नानवस्त्रविभूषणैः यावच्छक्योपचारैर्वा त्व
र्चयेन्माममायया २७ विभवे सति कर्पूरकुंकुमागरुचंदनैः अर्चयेन्मंत्र
वन्नित्यं सुगंधकुसुमैः शुभैः २८ दशावरणपूजां वैह्यागमोक्तां प्रकारये
त् नीराजनैर्धूपदीपैर्नैवेद्यैर्बहुविस्तरैः २९ श्रद्धयोपहरेन्नित्यं श्र १७
श्रद्धादत्तभोक्ता द्धानुगहमीश्वरः होमं कुर्यात्प्रयत्नेन विधिना मंत्रकोविदः ३० अग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्सेनोक्तमार्गेण कुंडेनागमवित्तमः जुहुयान्मूलमंत्रेण पुंसूक्तेनाथवाबुधः
॥३१ अथवौपासनाग्नौवाचारुणा हविषातथा तप्तजांबूनदप्रख्यं दिव्याभ
रणभूषितं ३२ ध्यायेदनलमध्यस्थं होमकालेसदाबुधः पार्षदेभ्योबलिंद
त्वाहोमशेषं समापयेत् ३३ ततोजपंप्रकुर्वीत ध्यायन्मांयतवाक्स्मरन्
मुखवासंचतांबूलं दत्वाप्रीतिसमन्वितः ३४ मदर्थेनृत्यगीतादिस्तुतिपा
ठादिकारयेत् प्रणमेद्दंडवद्भूमौहृदयेमांनिधायच ३५ शिरस्याधायमा
द्दत्तंप्रसादंभावनामयं पाणिभ्यांमत्पदेमूर्ध्नि गृहीत्वाभक्तिसंयुतः ३६ रक्षमां
घोरसंसारादित्युक्त्वाप्रणमेत्सुधीः उद्वासयेद्यथापूर्वंप्रत्यग्ज्योतिषिसंस्मर हृदयस्थे
न् ३७ एवमुक्तप्रकारेण पूजयेद्विधिवद्यदि इहामुत्रचसंसिद्धिंप्राप्नोतिम

प्रतिष्ठांध्यायेत्।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मामेवं ध्यात्वा दिने दिने मम पूजां करोति

रा॰ कि॰ ४ दनुग्रहात् ३८ मद्भक्तो यदि मामेवं पूजां चैव दिने दिने करोति मम सारूप्यं प्रा
१८ प्नोत्येव न संशयः ३९ इदं रहस्यं परमं च पावनं मयैव साक्षात्कथितं सनातनं।
पठत्यजस्रं यदि वा शृणोति यः स सर्वपूजाफलभाङ्न संशयः ४० एवं परात्मा
श्रीरामः क्रियायोगमनुत्तमं पृष्टः प्राह स्वभक्ताय शेषांशाय महात्मने ४१
पुनः प्राकृतवद्रामो मायामालंब्य दुःखितः हा सीतेति वदन्नेव निद्रां लेभे क
थंचन ४२ एतस्मिन्नंतरे तत्र किष्किंधायां सुबुद्धिमान् हनूमान्प्राह सुग्रीवं ए
कांते कपिनायकं ४३ शृणु राजन्प्रवक्ष्यामि तवैव हितमुत्तमं रामेण ते कृतः
पूर्वमुपकारो ह्यनुत्तमः ४४ कृतघ्नवत्त्वया नूनं विस्मृतः प्रतिभाति मे त्वत्कृ १८
ते निहतो वाली वीरस्त्रैलोक्यसंमतः ४५ राज्ये प्रतिष्ठितोसि त्वं तारां प्राप्तोसि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुर्लभां स रामः पर्वतस्याग्रे भ्रात्रा सह वसन्सुधीः ४६ त्वदागमनमेकाग्रमी
क्षते कार्यगौरवात् त्वं तु वानरभावेन स्त्रीसक्तो नावबुध्यसे ४७ करोमीति
प्रतिज्ञाय सीतायाः परिमार्गणं न करोषि कृतघ्नस्त्वं हन्यसे वालिवत् ध्रुवम्
४८ हनूमद्वचनं श्रुत्वा सुग्रीवो भयविह्वलः प्रत्युवाच हनूमन्तं सत्यमेव त्व
योदितं ४९ शीघ्रं कुरु मदाज्ञां त्वं वानराणां तरस्विनां सहस्राणि दशेदानीं प्रे
षयाशु दिशो दश ५० सप्तद्वीपगतान्सर्वान्वानरानानयंतु ते पक्षमध्ये स ना
मायांतु सर्वे वानरपुंगवाः ५१ ये पक्षमतिवर्तंते ते वध्या मे न संशयः इत्या
ज्ञाप्य हनूमंतं सुग्रीवो गृहमाविशत् ५२ सुग्रीवाज्ञां पुरस्कृत्य हनूमान्मंत्रिस
त्तमः तत्क्षणे प्रेषयामास हरीन्दशादिशः सुधीः ५३ अगणितगुणसत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

 न्वायुवेगप्रचारान्वनचरगणमुख्यान्पर्वताकाररूपान् पवनहितकुमारः प्रेषयामा
१९ ता सदूरं नतिरनसततरात्मादानमानादितृप्तान् ५४ ॥इतिश्रीमदध्यात्मरामायणे
उमामहेश्वरसंवादे किष्किंधाकांडेचतुर्थः सर्गः ४ श्रीमहादेवउवाच रामस्तुपर्वत
स्याग्रेमणिसानौनिशामुखे सीताविरहजंशोकमसहन्निदमब्रवीत् १ पश्यलक्ष्मण
मेसीताराक्षसेनहृताबलात् मृताऽमृतावानिश्चेतुंनजानेद्यापिभामिनी २ जीव
तीतिममब्रूयात्कश्चिद्वाप्रियकृत्समे यदिजानामितांसाध्वींजीवंतीयत्रकुत्रवा ३
हठादेवाहरिष्यामिसुधामिवपयोनिधेः प्रतिज्ञांशृणुमेभ्रातर्येनमेजनकात्मजा
४ नीतातंभस्मसात्कुर्यांसपुत्रबलवाहनं हासीतेचंद्रवदनेवसंतीराक्षसालये १९
५ दुःखार्त्तामामपश्यंतीकथंप्राणान्धरिष्यसि चंद्रोपिभानुवद्भातिममचंद्राननांवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ना ६ चेद्वृत्वे जानकीं स्पृष्ट्वा करैर्मां स्पृशसीत तैः सुग्रीवोपि दयाहीनो दुःखितं मां न प
श्यति ७ राज्यं निष्कंटकं प्राप्य स्त्रीभिः परिवृतो रहः कृतघ्नो दृश्यते व्यक्तं पानासक्तोऽति
कामुकः ८ नायाति शरदं पश्यन्नपि मार्गयितुं प्रियां पूर्वोपकारिणं दुष्टः कृतघ्नो विस्म
तो हि मां ९ हन्मि सुग्रीवमप्येवं सपुरं सह बांधवं वाली यथा हतो मेद्य सुग्रीवोपि तथा भवे
त् १० इति रुष्टं समालोक्य राघवं लक्ष्मणोब्रवीत् इदानीमेव गत्वाहं सुग्रीवं दुष्टमा
नसं ११ मामाज्ञापय हत्वा तमायास्ये राम तेंतिकं इत्युक्त्वा धनुरादाय खड्गं तूणीरमे
व च १२ गंतुमभ्युद्यतं वीक्ष्य रामो लक्ष्मणमब्रवीत् न हंतव्यस्त्वया वत्स सुग्रीवो मे
प्रियः सखा १३ किं तु भीषय सुग्रीवं वालिवध्वहनिष्यसे इत्युक्त्वा शीघ्रमादाय सुग्री
वप्रति भाषितं १४ आगत्यैव पश्चाद्यत्कार्यं तत्करिष्याम्यसंशयं तथेति लक्ष्मणो गछत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ कि॰ ५ २० रितोभीमविक्रमः १५ किष्किंधांप्रतिकोपेननिर्दहन्निववानरान् सर्वज्ञोनित्यलक्ष्मी
कोविज्ञानात्मापिराघवः १६ सीतामनुशुशोचार्त्तः प्राकृतः प्राकृतामिव बुध्यादिसा संयोगवियोगशालिनी
क्षिणस्तस्यमायाकार्योनिवर्तिनः १७ रागादिरहितस्यास्यतत्कार्यंकथमुद्भवेत् अ
स्मणोत्क्रमन्तंकर्तुंराज्ञोदशरथस्यहि १८ तपसः फलदानायजातोमानुषवेषधृक् मा
ययामोहिताःसर्वेजनाअज्ञानसंयुताः १९ कथमेषांभवेन्मोक्षइतिविष्णुर्विचिंतयन्
कथांप्रथयितुंलोकेसर्वलोकमलापहां २० रामायणाभिधांरामोभूत्वामानुषचेष्टकः। मानुषवेषधृगिति पाठांतर
क्रोधंमोहंचकामंचव्यवहारार्थसिद्धये २१ तत्तत्कालोचितंगृह्णन्मोहयत्यवशाःप्र
जाः अनुरक्तइवाशेषगुणेषुगुणवर्जितः २२ विज्ञानमूर्तिर्विज्ञानशक्तिः साक्ष्य २०
गुणान्वितः अतःकामादिभिर्नित्यमविलिप्तोयथानभः २३ विंदंतिमुनयःकेचिज्ज्ञानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिसनकादयः तद्भक्ता निर्मलात्मानः सम्यक् जानंति नित्यदा २४ भक्तचित्तानु
सारेण जायते भगवानजः लक्ष्मणोपि तदा गत्वा किष्किंधानगरांतिके २५ ज्याघो
षमकरोत्तीव्रं भीषयन्सर्ववानरान् तं दृष्ट्वा प्राकृतास्तत्र वानरा वप्रमूर्धनि २६ च
क्रुः किलकिलाशब्दं धृतपाषाणपादपाः तान्दृष्ट्वा क्रोधताम्राक्षो वानरान्लक्ष्मण
स्तदा २७ निर्मूलान्कर्तुमुद्युक्तो धनुरानम्य वीर्यवान् ततः शीघ्रं समासाद्य ज्ञात्वा
लक्ष्मणमागतं २८ निवार्य वानरान्सर्वानंगदो मंत्रिसत्तमः गत्वा लक्ष्मणसामी
प्यं प्रणनाम सदंडवत् २९ ततोंगदं परिष्वज्य लक्ष्मणः प्रियवर्धनः उवाच वत्स ग प्रियाणां रद्धि करणशीलः
च्छ त्वं पितृव्याय निवेदय ३० मामागतं राघवेण चोदितं रौद्रमूर्तिना तथेति त्व
रितं गत्वा सुग्रीवायन्यवेदयत् ३१ लक्ष्मणः क्रोधताम्राक्षः पुरद्वारि बहिः स्थितः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा·किं·५ तच्छ्रुत्वातीवसंत्रस्तः सुग्रीवोवानरेश्वरः ३२ आहूयमंत्रिणांश्रेष्ठं हनूमंतम
२१ थाब्रवीत् गच्छत्वमंगदेनाशु लक्ष्मणंविनयान्वितः ३३ सांत्वयन्कोपितंवीरं
शनैरानयमंदिरं प्रेषयित्वाहनूमंतंतारामाहकपीश्वरः ३४ त्वंगच्छसांत्वयंती
तंलक्ष्मणंमृदुभाषितैः शांतमंतःपुरंनीत्वापश्चाद्दर्शयमेऽनघे ३५ भवत्वि
स्त्रीसंचारमर्यादास्थलं तितमस्तारामध्यकक्षांसमाविशत् हनूमानंगदेनैवसहितोलक्ष्मणांतिकं
३६ गत्वाननामशिरसानत्यास्वागतमब्रवीत् एहिवीरमहाभागभवद्गृ
हमशंकितं ३७ प्रविश्यराजदारादीन्दृष्ट्वासुग्रीवमेवच यदाज्ञापयसे
पश्चात्तत्सर्वंकरवाणिभोः ३८ इत्युक्त्वालक्ष्मणंभक्त्याकरेगृह्यसमाहितः २१
आनयामासनगरमध्याद्राजगृहंप्रति ३९ पश्यंस्तत्रमहासौधान्यूथपानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समंततः जगाम भवनं राज्ञः सुरेंद्रभवनोपमं ४० मध्यकक्षेगतां(स्त)त्र ताराता
राधिपाननां सर्वाभरणसंपन्नां मदरक्तांतलोचनां ४१ उवाच लक्ष्मणं नत्वास्मि
तपूर्वाभिभाषिणी याहि देवर भद्रं ते साधुस्त्वं भक्तवत्सलः ४२ किमर्थं कोपमाका
र्षीर्भर्त्तेस्ते कपीश्वरे बहुकालमनोभ्यासं दुःखमेवानुभूतवान् ४३ इदानीं स्वं॰ ॰निरंतरमित्यर्थः
बहुदुःखौघाद्भवद्भिरभिरक्षितः भवत्प्रसादात्सुग्रीवः प्राप्तसौख्यो महामतिः
४४ कामासक्तोरघुपतेः सेवार्थं नागतो हरिः आगमिष्यंति हरयो नानादेश
गताः प्रभो ४५ प्रेषिताद्दशसाहस्राहरयो रघुसत्तम आनेतुं वानरान्दिग्भ्यो
महापर्वतसन्निभान् ४६ सुग्रीवः स्वयमागत्य सर्ववानरयूथपैः विधमिष्यति
दैत्यौघान् रावणं च हनिष्यति ४७ त्वयैव सहितो धैर्यं गंता वानरपुंगवः पश्य

६ कामासक्तोपि नागतः इति न किंत्वागत एव। कथमागतस्तत्राह। आगमिष्यंतीति।—

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेत्वयासहैवनयस्वेनैवसहनयेत्यर्थः।१=

रा॰कि॰५ तर्भवनंतत्रपुत्रदारसुहृद्वृतं ४८ दृष्ट्वासुग्रीवमनयंदत्वानयसहैवते तारायाव
२२ श्र च्चनंश्रुत्वालक्ष्मणःक्रोधोयलक्ष्मणः ४९ जगामांतःपुरंयत्रसुग्रीवोवानरेश्वरः रुमा
मालिंग्यसुग्रीवःपर्यंकेपर्यवस्थितः ५० दृष्ट्वालक्ष्मणमत्यर्थंउत्पपाताति भीतवत्
तंदृष्ट्वालक्ष्मणःक्रुद्धोमदविह्वलितेक्षणं ५१ सुग्रीवंप्राहदुर्वृत्तविस्मृतोसिरघू
=५त्वां हंतुमितिशेषः त्तमं वालीयेनहतोवीरःसबाणोघप्रतीक्षते ५२ तमेववालिनोमार्गं गमिष्यसि
मयाहतः एवमत्यंतपरुषं वदंतंलक्ष्मणंतदा ५३ उवाचहनूमान्वीरःकथमेवंप्र
भाषसे त्वत्तोधिकतरोरामे भक्तोयंवानराधिपः ५४ रामकार्यार्थमनिशंजागर्ति
नत्तुविस्मृतः आगताःपरितःपश्यवानराःकोटिशःप्रभो ५५ गमिष्यंत्यचिरेणैव २२
सीतायाःपरिमार्गणं साधयिष्यतिसुग्रीवोरामकार्यमशेषतः ५६ श्रुत्वाहनुमतो
कर्तुमितिशेषः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाक्यं सौमित्रिर्लज्जितोऽभवत् सुग्रीवोऽप्यर्घ्यपाद्याद्यैर्लक्ष्मणं समपूजयत् ५७
आलिंग्य प्राह रामस्य दासोऽहं तेन रक्षितः रामः स्वतेजसा लोकान्क्षणार्धेनैव जे
ष्यति ५८ सहायमात्रमेवाहं वानरैः सहितः प्रभो सौमित्रिरपि सुग्रीवं प्राह किंचि
न्मयोदितं ५९ तत्क्षमस्व महाभाग प्रणयाद्भाषितं मया गच्छामोऽद्यैव सुग्रीव रामस्ति
ष्ठति कानने ६० एक एवातिदुःखार्त्तो जानकीविरहात्प्रभुः तथेति रथमारुह्य लक्ष्म
णेन समन्वितः ६१ वानरैः सहितो राजा राममेवान्वपद्यत भेरीमृदंगैर्बहुऋक्षवान
रैः श्वेतातपत्रव्यजनैश्च शोभितः नीलांगदाद्यैर्हनुमत्प्रधानैः समावृतो राघवमभ्य
गाद्धरिः ६२ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे किष्किंधाकांडे पं
चमः सर्गः ५ श्रीमहादेव उ० दृष्ट्वा रामं समासीनं गुहाद्वारि शिलातले चैलाजि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा·किं·६ नधरं श्यामं जटामौलिविराजितं १ विशालनयनं शांतं स्मितचारुमुखांबुजं
२३ सीताविरहसंतसंपश्यंतंमृगपक्षिणः २ दृष्ट्वादूरात्समुत्प्लुत्यवेगात्सुग्रीव
लक्ष्मणौ रामस्यपादयोरग्रेपेततुर्भक्तिसंयुतौ ३ रामः सुग्रीवमालिंग्यपृष्ट्वाना
मयमंतिके स्थापयित्वायथान्यायंपूजयामासधर्मवित् ४ ततोब्रवीद्रघुश्रेष्ठं
सुग्रीवोभक्तिनम्रधीः देवपश्यसमायांतींवानराणांमहाचमूं ५ कुलाचलाद्रिसं
भूतामेरुमंदरसन्निभाः नानाद्वीपसरिच्छैलवासिनःपर्वतोपमाः ६ असंख्या
ताः समायांतिहरयः कामरूपिणः सर्वेदेवांशसंभूताः सर्वेयुद्धविशारदाः ७
अत्रेकेचिद्गजबलाः केचिद्दशगजोपमाः गजायुतबलाःकेचिदिमेऽमितबलाः २३
:प्रभो ८ केचिदंजनकूटाभाःकेचित्कनकसंन्निभाः केचिद्रक्तांतवदनादीर्घ
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

बालास्तथापरे ९ शुद्धस्फटिकसंकाशाः केचिद्राक्षससंनिभाः गर्जंतः परितोयांति
वानरायुद्धकांक्षिणः १० त्वदाज्ञाकारिणः सर्वे फलमूलाशनाः प्रभो ऋक्षाणाम
धिपोवीरो जांबवान्नाम बुद्धिमान् ११ एषमेमंत्रिणांश्रेष्ठः कोटिभल्लूकवृंदयः ह
नूमानेषविख्यातोमहासत्वपराक्रमः १२ वायुपुत्रोतितेजस्वीमंत्री बुद्धिमतांव
रः नलोनीलश्चगवयोगवाक्षोगंधमादनः १३ शरभोमैंदवश्चैवगजः पन
सएवच बलीमुखोदधिमुखः सुषेणस्तारएवच १४ केशरीचमहासत्वः
पिताहनुमतोबली एतेमयूथपाराम प्राधान्येनमयोदिताः १५ महात्मा
नोमहावीर्याः शक्रतुल्यपराक्रमाः एतेप्रत्येकतः कोटिकोटिवानरयूथपाः
१६ तवाज्ञाकारिणः सर्वे सर्वे देवांशसंभवाः एषवालिसुतः श्रीमानंगदो ग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ कि॰ ६ नामविश्रुतः १७ वालितुल्यबलोवीरोराक्षसानांबलांतकः एतेचान्येत्वबहव
२५ स्त्वदर्थेत्यक्तजीविताः १८ योद्धारःपर्वताग्रेश्चनिपुणाःशत्रुघातने आज्ञापयर
घुश्रेष्ठसर्वेतेवशवर्तिनः १९ रामःसुग्रीवमालिंग्यहर्षपूर्णाश्रुलोचनः प्रा
हसुग्रीवजानासिसर्वंत्वंकार्यगौरवम् २० मार्गणार्थेहिजानक्यानियुंक्ष्वयदि
रोचते श्रुत्वारामस्यवचनंसुग्रीवःप्रीतमानसः २१ प्रेषयामासबलिनोवान
रान्वानरर्षभः दिक्षुसर्वासुविविधान्वानरान्प्रेष्यसत्वरं २२ दक्षिणांदिश
मत्यर्थंप्रयत्नेनमहाबलान् युवराजंजांबवंतंहनूमंतंमहाबलं २३ नलंसु
षेणंशरभंमैंदंद्विविदमेवच प्रेषयामाससुग्रीवोवावचनंचेदमब्रवीत् २४
विचिन्वंतुप्रयत्नेनभवंतोजानकींशुभां मासादर्वाक्निवर्तध्वंमच्छासनपुरः २४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सराः २५ सीतामदृष्ट्वायदिवोमासादूर्ध्वेदिनेभवेत् तदाप्राणांतिकंदंडंमत्तः
प्राप्स्यथवानराः २६ इतिप्रस्थाप्यसुग्रीवोवानरान्भीमविक्रमान् रामस्यपा
र्श्वेश्रीरामंनत्वाचोपविविशसः २७ गच्छंतंमारुतिंदृष्ट्वारामोवचनमब्रवी
त् अभिज्ञानार्थमेतन्मेह्यंगुलीयकमुत्तमं २८ मन्नामाक्षरसंयुक्तंसीता
यैदीयतांरहः अस्मिन्कार्येप्रमाणंहित्वमेवकपिसत्तम जानामिसत्वंते
सर्वंगच्छपंथाःशुभस्तव २९ एवंकपीनांराज्ञातेविसृष्टाःपरिमार्गणे सीता
याश्चांगदमुखाबभ्रमुस्तत्रतत्रह ३० भ्रमंतोविंध्यगहनेददृशुःपर्वतोपमं॥
राक्षसंभीषणाकारंभक्षयंतंमृगान्गजान् ३१ रावणोयमितिज्ञात्वाकेचि
द्वानरपुंगवाः जघ्नुःकिलकिलाशब्दंमुंचंतोमुष्टिभिःक्षणात् ३२ नायंरावण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गह्वरं

रा॰कि॰ ६ इत्युक्त्वा ययुरन्यन्महद्वनं तृषार्त्ताः सलिलं तत्र नाविंदन्हरिपुंगवाः ३३ विभ्रमं
२५ तो महारण्ये शुष्ककंठोष्ठतालुकाः ददृशुर्नगरं तत्र तृणगुल्मावृतं महत् ३४
आर्द्रपक्षान्क्रौंचहंसान्निःसृतान्ददृशुस्ततः अत्रास्ति सलिलं नूनं प्रविशामो महा
गुहां ३५ इत्युक्त्वा हनुमानग्रे प्रविवेश तमन्वयुः सर्वे परस्परं धृत्वा बाहून्बाहु
भिरुत्सुकाः ३६ अंधकारे महद्दूरं गत्वाप श्यन्कपीश्वराः जलाशयान्मणिनि
भतोयान्कल्पद्रुमोपमान् ३७ वृक्षान्पक्वफलैर्नम्रान्मधुद्रोणसमन्वितान् गृहा
न्सर्वगुणोपेतान्मणिवस्त्रादिपूरितान् ३८ दिव्यभक्षान्नसहितान्मानुषैः प
रिवर्जितान् विस्मितास्तत्र भवने दिव्ये कनकविष्टरे ३९ प्रभया दीप्यमानां तु द २५
दृशुस्त्रियमेकलां ध्यायंतीं चीरवसनां योगिनीं योगमास्थितां ४० प्रणेमुस्तां महा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नागांभक्ष्यानीत्याचवानराः दृष्ट्वातान्वानरान्देवीप्राहयूयंकिमागताः ४१ कुतो
वाकस्यदूतोवामत्स्थानंकिंप्रधर्षथ तच्छ्रुत्वाहनुमानाहशृणुवक्ष्यामिदेविते ४२
अयोध्याधिपतिःश्रीमान्राजादशरथःप्रभुः तस्यपुत्रोमहाभागोज्येष्ठोरामइति
श्रुतः ४३ पितुराज्ञांपुरस्कृत्यसभार्यःसानुजोवनं गतस्तत्रहृताभार्यातस्यसा
ध्वीदुरात्मना ४४ रावणेनततोरामःसुग्रीवंसानुजोययौ सुग्रीवोमित्रभावेनराम
स्यप्रियवल्लभां ४५ मृगयध्वमितिप्राहततोवयमुपागताः ततोवयंविचिन्वंतो
जानकींजलकांक्षिणः ४६ प्रविष्टागह्वरंघोरंदैवादत्रसमागताः त्वंवाकिमर्थं
मत्रासिकावात्वंवदनःशुभे ४७ योगिनीचतथादृष्ट्वावानरान्प्राहहृष्टधीः यथे
ष्टंफलमूलानिजग्ध्वापीत्वामृतंपयः ४८ आगच्छततोवक्ष्येममवृत्तांतमादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰कि॰ ६ ततः तथेतिमुक्त्वापीत्वा च हृष्टास्ते सर्वे वानराः ५९ देव्याः समीपं गत्वा ते बद्धांज
२६ लिपुटाः स्थिताः ततः प्राह हनूमंतं योगिनी दिव्यदर्शना ५० हेमा नाम पुरा दिव्य
रूपिणी विश्वकर्मणः पुत्री महेशं तस्तेन तोषयामास भामिनी ५१ तुष्टो महेशः
प्रददाविदं दिव्यपुरं महत् अत्र स्थिता सा सुदती वर्षाणामयुतायुतं ५२ तस्या
अहं सखी विष्णुतत्परा मोक्षकांक्षिणी नाम्ना स्वयंप्रभा दिव्यगंधर्वतनया पुरा
त ५३ गच्छंती ब्रह्मलोकं सा मामाह दें पश्चर अत्रैव निवसं नीत्वं सर्वप्राणिविवर्जिते
५४ त्रेतायुगे दाशरथिर्भूत्वा नारायणोऽव्ययः भूभारहरणार्थाय विचरिष्यति
कानने ५५ मार्गंतो वानरास्तस्य भार्यां मायांति ते गुहां पूजयित्वाथ तान् गत्वा २६
रामं स्तुत्वा प्रयत्नतः ५६ यातास्मि भवनं विष्णोर्योगिगम्यं सनातनं इतोऽहं गंतुमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्यभिरामंद्रष्टुंत्वरान्विता ५७ यूयंपिदध्वमक्षीणिगमिष्यथबहिर्गुहां तथैवच
क्रुस्तेवेगाद्गताःपूर्वस्थितंवनं ५८ सापित्यक्त्वागुहांशीघ्रंययौराघवसन्निधिं॥
तत्ररामंससुग्रीवंलक्ष्मणंचददर्शह ५९ कृत्वाप्रदक्षिणंरामंप्रणम्यबहुशःसु
धीः आहगद्गदयावाचारोमांचिततनूरुहा ६० दासीतवाहंराजेंद्रदर्शनार्थमि
हागता बहुवर्षसहस्राणितप्तंमेदुश्चरंतपः ६१ गुहायांदर्शनार्थंतेफलि
तंमेघतत्तपः अद्यहित्वांनमस्यामिमायायाःपरतःस्थितं ६२ सर्वभूतेषु
चालक्ष्यंबहिरंतरवस्थितं योगमायाजवनिकाछन्नोमानुषविग्रहः ६३ नल
क्ष्यसेज्ञानदृशांशैलूषइवरूपधृक् महाभागवतानांत्वंभक्तियोगविधित्सया॥
६४ अवतीर्णोसिभगवन्कथंजानामितामसी लोकेजानातुयःकश्चित्तवत

=३ योगमायैवजवनिकानराणांपटनिर्मितंयेषयहणरूपावरणं२ =२महाभागवतानांभक्ति योगंविधातुमिच्छया

३ तथापि स्तौमी विशेषः

रा॰कि॰ ६ त्वं रघूत्तम ६५ ममैतदेव रूपं ते सदा भातु हृदालये राम ते पादयुगलं दर्शितं
२७ मोक्षदर्शनं ६६ अदर्शनं भवार्णानां सन्मार्गपरिदर्शनं धनपुत्रकलत्रादि
विभूतिपरिदर्पितः ६७ अकिंचनधनं त्वां यं नाभिधातुं जनोर्हति निवृत्तगु
णमार्गाय निष्किंचनधनाय ते ६८ नमः स्वात्माभिरामाय निर्गुणाय गुणात्म
ने कालरूपिणमीशानमादिमध्यांतवर्जितं ६९ समं चरंतं सर्वत्र मन्ये त्वां पु
रुषं परं देव ते चेष्टितं कश्चिन्न वेद नृविडंबनं ७० न तेस्ति कश्चिद्दयितो द्वेष्यो
मनुष्यव्यवहारानुकरणरूपं
वा पर एव च त्वन्मायापिहितात्मानस्त्वां पश्यंति तथाविधं ७१ अजस्याकर्तु
रीशस्य देव तिर्यङ्नरादिषु जन्मकर्मादिकं यद्यत्तदत्यंतविडंबनं ७२ त्वामा २७
हुरक्षरं जातं कथाश्रवणसिद्धये केचित्कोशलराजस्य तपसः फलसिद्धये
७३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कौशल्ययाप्रार्थ्यमानं जातमाहुः परेजनाः दुष्टराक्षसभूभारहरणायार्थितोवि
ष्णुः ७४ ब्रह्मणानररूपेणजातोयमितिकेचन शृण्वंतिगायंतिचयेकथास्तेरघुनं
दन ७५ पश्यंतितवपादाब्जं भवार्णवसुतारणं त्वन्मायागुणबद्धाहंव्यतिरिक्तं
गुणाश्रयं ७६ कथंत्वांदेवजानीयांस्तोतुंवाविषयंविभुं नमस्यामिरघुश्रेष्ठ
बाणासनशरान्वितं लक्ष्मणेनसहभ्रात्रासुग्रीवादिभिरन्वितं ७७ एवंस्तु
तोरघुश्रेष्ठःप्रसन्नःप्रणतार्तिहृत् उवाचयोगिनींभक्त्यांकिंतेमनसिकांक्षितं
७८ साप्राहराघवंभक्त्याभक्तिंतेभक्तवत्सल यत्रकुत्रापिजातायानिश्चलां
देहिमेप्रभो ७९ त्वद्भक्तेषुसदासंगोभूयान्मेप्राकृतेषुन जिह्वामेरामरामे
तिभक्त्यावदतुसर्वदा ८० मानसंश्यामलंरूपंसीतालक्ष्मणसंयुतं धनु

२ गुणेभ्योव्यतिरिक्तंतद्धेयास्य त्वं गुणानामाश्रयंप्रवर्तकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰ कि॰ ६ वीणधरंपीतवाससंमुकुटोज्वलं ८१ अंगदैर्नूपुरैर्मुक्ताहारैःकौस्तुभकुंडलैः
२८ भांतंस्मरतुमेरामवरंनान्यंरणेप्रभो ८२ श्रीरामउ॰ भवन्नेत्वंमहाभागगच्छत्वं
बदरीवनं तत्रैवमांस्मरंतीत्वंत्यक्त्वेदंभूतपंचकं ८३ मामेवपरमात्मानमचि
रात्प्रतिपद्यसे श्रुत्वारघूत्तमवचो॰ मृतसारकल्पंगत्वातदैवबदरीतरुखंडजु
ष्टं तीर्थंतदारघुपतिंमनसास्मरंतीत्यक्त्वाकलेवरमवापपरंपदंसा ८४
॥इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेकिष्किंधाकांडेषष्ठःसर्गः ६
श्रीमहादेवउवाच अथतत्रसमासीनावृक्षखंडेषुवानराः चिंतयंतोविमुह्यं
तःसीतामार्गणकर्शिताः १ तत्रोवाचांगदःकांश्चिद्वानरान्वानरर्षभः भ्र २८
मत्तांगव्हरेस्माकंमासोनूनंगतोभवत् २ सीतानाधिगतास्माभिर्नकृतं

राजशासनं यदि गच्छामि किष्किंधां सुग्रीवोऽस्मान्हनिष्यति ३ विशेषतः श
त्रुसुतं मां मिषान्निहनिष्यति मयि तस्य कुतः प्रीतिरहं रामेण रक्षितः ४ इदा
नीं रामकार्यं मे न कृतं तन्मिषं भवेत् तस्य मद्धनने नूनं सुग्रीवस्य दुरात्मनः ५
मातृकल्पां भ्रातृभार्यां पापात्मानुभवत्यसौ न गच्छेयमतः पार्श्वे तस्य वानरपुं
गवाः ६ व्यथिताः साश्रुनयना युवराजमथाब्रुवन् किमर्थं तव शोकोत्र वयं
ते प्राणरक्षकाः ८ भवामो निवसामोत्र गुहायां भयवर्जिताः सर्वसौभाग्य
सहितं पुरं देवपुरोपमं ९ शनैः परस्परं वाक्यं वदतां मारुतात्मजः १० श्रुत्वां
गदं समालिंग्य प्रोवाच नयकोविदः विचार्यते किमर्थं ते दुर्विचारो न युज्यते
११ राज्ञोऽत्यंतप्रियस्त्वं हि तारापुत्रोति वल्लभः रामस्य लक्ष्मणात्प्रीतिस्त्वयि
५ त्वच्छ्रामि जीवितं चात्र येन केनापि मृत्युना इत्यश्रुनयनं केचित् दृष्ट्वा वानरपुंगवाः ७॥ ५
उद्धधादिप्रकारेण

रा॰किं॰ ७ नित्यंप्रवर्धते १२ अतोनराघवाद्भीतिस्तवराज्ञोविशेषतः अहंतवहितेस
२९ क्तोवत्सनान्यंविचारय १३ गुहावासश्चनिर्वेधइत्युक्तंवानरेस्तुयत् तदे
तद्रामबाणानांनिर्वेधंकिंजगत्त्रये १४ येत्वांदुर्बोधयंत्येतेवानरावानरर्षभ
॥ पुत्रदारादिकंत्यक्त्वाकथंस्थास्यंतितेत्वया १५ अन्यद्गुह्यतमंवक्ष्येरहस्यं
शृणुमेसुत रामोनमानुषोदेवःसाक्षान्नारायणोव्ययः १६ सीताभगवती
मायाजनसंमोहकारिणी लक्ष्मणोभुवनाधारःसाक्षाच्छेषःफणीश्वरः १७
ब्रह्मणाप्रार्थिताःसर्वेरक्षोगणविनाशने मायामानुषभावेनजातालोकैक
रक्षकाः १८ वयंचपार्षदाःसर्वेविष्णोर्वैकुंठवासिनः मनुष्यभावंपन्नेस्वे मा २९
छयापरमात्मनि १९ वयंवानररूपेणजातास्तस्यैवमायया वयंतुतपसा

पूर्वमाराध्यजगतांपतिं २० तेनैवानुगृहीताःस्मःपार्षदत्वमुपागताः इदा
नीमपितस्यैवसेवांकृत्वाविमायया २१ पुनर्वैकुंठमासाद्यसुखंस्थास्याम
हेवयं इत्यंगदंसमाश्वास्यगताविंध्यमहालयं २२ विचिन्वंतोथतत्रानैवे
जानकींदक्षिणांबुधेः तीरेमहेंद्राख्यगिरेःपवित्रंपादमाययुः २३ दृष्ट्वा
समुद्रंदुःपारमगाधंभयवर्धनं वानराभयसंत्रस्ताः किंकुर्म इतिवादिनः
६ २४ निषेदुरूधेस्तीरेसर्वेचिंतासमन्विताः मंत्रयामासुरन्योन्यमंगदाद्याम
हाबलाः २५ भ्रमंतामेवनोमासोगतोत्रैवगुहांतरे नदृष्टोरावणोवापिसीता
वाजनकात्मजा २६ सुग्रीवस्तीक्ष्णदंडोऽस्मान्निहंत्येवनसंशयः सुग्रीवव
धनोस्माकंश्रेयःप्रायोपवेशनं २७ इतिनिश्चित्यतत्रैवदर्भानास्तीर्यसर्वतः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰कि॰७ उपाविविशुस्तेसर्वेमरणेकृतनिश्चयाः २८ एतस्मिन्नंतरेतत्रमहेंद्राद्रिगुहांतरा
३० त् निर्गत्यशनकैरागाद्गृध्रःपर्वतसन्निभः २९ दृष्ट्वाप्रायोपवेशेनस्थितान्वान
रपुंगवान् उवाचशनकैर्गृध्रःप्राप्तोमक्ष्योद्यमेबहुः ३० एकैकशःक्रमात्सर्वान्
भक्षयामिदिनेदिने श्रुत्वातद्गृध्रवचनंवानराभीतमानसाः ३१ भक्षयिष्यति
नःसर्वानसौगृध्रोनसंशयः रामकार्यंचनास्माभिः कृतंकिंचिद्धरीश्वराः ३२
सुग्रीवस्यापिचहितंनकृतंस्वात्मनामपि वृथानेनवधंप्राप्ताः गच्छामोयमसा
दनं ३३ अहोजटायुर्धर्मात्मारामस्यार्थेमृतःसुधीः मोक्षंप्रापदुरावापंयोगिना
मप्यरिंदमः ३४ संपातिस्तुतदावाक्यंश्रुत्वावानरभाषितं केवायंममभ्रातुः ३०
कर्णपीयूषसन्निभं ३५ जटायुरितिनामाद्यव्याहरंतःपरस्परं उच्यतांवोनयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

माभून्मत्तः प्लवगसत्तमाः ३६ तमुवाचांगदः श्रीमानुत्थितो गृध्रसन्निधौ रा
मो दाशरथिः श्रीमान् लक्ष्मणेन समन्वितः ३७ सीतया भार्यया सार्धं विचचा
र वनांतरे तस्य सीता हृता साध्वी रावणेन दुरात्मना ३८ मृगयां निर्गते रामे ल
क्ष्मणे च हृता बलात् रामरामेति क्रोशंती श्रुत्वा गृध्रः प्रतापवान् ३९ जटायुर्ना
म पक्षींद्रो युद्धं कृत्वा सुदारुणं . रावणेन हतो वीरो राघवार्थं महाबलः ४० रा
मेण दग्धो रामस्य सायुज्यमगमत्क्षणात् रामः सुग्रीवमासाद्य सख्यं कृत्वाग्नि
साक्षिकं ४१ सुग्रीवचोदितो हत्वा वालिनं सुदुरासदं राज्यं ददौ वानराणां सु
ग्रीवाय महाबलः ४२ सुग्रीवः प्रेषयामास सीतायाः परिमार्गणे अस्मान्वा
नरवृंदान्वै महासत्वान्महाबलः ४३ मासादर्वाङ्निवर्त्तध्वं नो चेत्प्राणान्हरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मित्रः इत्याज्ञया भ्रमंतोस्मिन् वने गह्वर मध्यगाः ४४ गतो मासो न जानीमः
सीतां वा रावणं चवा मर्त्तुं प्रायोपविष्टाः स्मस्तीरे लवण वारिधेः ४५ यदि जाना
सि हे पक्षिन् सीतां कथयनः शुभां अंगदस्य वचः श्रुत्वा संपातिर्हृष्टमानसः
४६ उवाच मत्प्रियो भ्राता जटायुः प्लवगेश्वराः बहु वर्ष सहस्त्रांते भ्रातृ वार्त्ता
श्रुता मया ४७ वाक्स हायं करिष्येहं भवतां प्लवगेश्वराः भ्रातुः सलिल दाना
य नयध्वं मां जलांतिकं पश्चात्सर्वं शुभं वक्ष्ये भवतां कार्यसिद्धये ४८ तथेति
निन्युस्ते तीरं समुद्रस्य विहंगमं सोपि तत्सलिले स्नात्वा भ्रातुर्दत्वा जलांजलिं
४९ पुनः स्वस्थानमासाद्य स्थितोनीतो हरीश्वरैः संपातिः कथयामास वानरा ३१
न्परिहर्षयन् ५० लंकानाम नगर्यास्ते त्रिकूट गिरि मूर्धनि तत्राशोकवने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सीता राक्षसीभिः सुरक्षिता ५१ समुद्रमध्ये सा लंका शतयोजनदूरतः दृश्यते मे
न संदेहः सीता च परिदृश्यते ५२ गृध्रत्वाद्दूरदृष्टिर्मे नात्र संशयितुं क्षमाः
शतयोजनविस्तीर्णं समुद्रं यस्तु लंघयेत् ५३ स एव जानकीं दृष्ट्वा पुनरायास्य
ति ध्रुवं अहमेव दुरात्मानं रावणं हंतुमुत्सहे ५४ भ्रातृहंतारमेकाकी किं तु प
क्षविवर्जितः यतध्वमतियत्नेन लंघितुं सरितां पतिं ततो हंता रघुश्रेष्ठो रावणं
राक्षसाधिपं ५५ उल्लंघ्य सिंधुं शतयोजनायतं लंकां प्रविश्याथ विदेहकन्य
कां दृष्ट्वा समाभाष्य च वारिधिं पुनस्तर्तुं स समर्थः कतमो विचार्यतां ५६ ॥इ
ति श्रीमदध्यात्मरामायणे किष्किंधाकांडे उमामहेश्वरसंवादे सप्तमः सर्गः ७
श्रीमहादेव उवाच॥ संपातिः कथयामास स्ववृत्तांतं पुराकृतं अहं पुरा जटायु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्च भ्रातरौ रूढयौवनौ १ बलेन दर्पितौ वां बलजिज्ञासया खगौ सूर्यमंडलपर्यंतं गं
तुमुत्पतितौ मदात् २ बहुयोजनसाहस्रं गतौ तत्र प्रतापितः जटायुस्तं परित्रातुं प
क्षैराछाद्यमोरतः ३ स्थितोऽहं रश्मिभिर्दग्धपक्षोऽस्मिन्विंध्यमूर्धनि पतितो दू
रपतनान्मूर्छितोऽहं कपीश्वराः ४ दिनत्रयात्पुनः प्राणमाहितो दग्धपक्षकः देशं
वा गिरिकूटान्वा न जाने भ्रांतमानसः ५ शनैरुन्मील्य नयने दृष्ट्वा तत्राश्रमं शुभं
शनैः शनैराश्रमस्य समीपं गतवांहने ६ चंद्रमानाममुनिराड् दृष्ट्वा मां विस्मितो
वदत् संपाते किमिदं ते घवि रूपं केन वा कृतं ७ जानामि त्वामहं पूर्वं मत्यंतं बल
वानसि दग्धौ किमर्थं ते पक्षौ कथ्यतां पदि मन्यसे ८ ततः स्वचेष्टितं सर्वं कथयि
त्वाति दुःखितः अब्रुवं मुनिशार्दूलं दग्धोहं दाववह्निना ९ कथं धारयितुं शक्तो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विपक्षोर्जीवितं प्रभो श्रुत्युक्तोथ मुनिवर्य्यस्य मादपाद्रविलोचनः १० शृणु वत्स वचो मे
य श्रुत्वा कुरु यथेप्सितं देहमूलमिदं दुःखं देहः कर्मसमुद्भवः ११ कर्मप्रवर्तते
देहेऽहं बुध्या पुरुषस्य हि अहंकारस्त्वनादिः स्याद विद्यासंभवो जडः १२ चिच्छा
यया सदा युक्तस्तमायः पिंडवत्सदा तेन देहस्य तादात्म्याद्देहस्थेन न वान् भवेत्
१३ देहोहमिति बुद्धिः स्यादात्मनोहंकृतेर्बलात् तन्मूल एष संसारः सुखदुःखादि
साधकः १४ आत्मनो निर्विकारस्य मिथ्यातादात्म्यतः सदा देहोहं कर्मकर्ताहमि
ति संकल्प्यस सर्वदा १५ जीवः करोति कर्माणि तत्फलैर्बध्यते वशः ऊर्ध्वाधो भ्रमते
नित्यं पापपुण्यात्मकः स्वयं १६ कृतं मयाधिकं पुण्यं यज्ञदानादि निश्चितं स्वर्गंग
त्वा सुखं भोक्ष्य इति संकल्पवान्भवेत् १७ तथैवाध्यासनस्तत्र चिरं भुक्त्वा सुखं मह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग.कि. ८ त क्षीणपुण्यः पतत्यर्वाग निच्छन्कर्मचोदितः १८ पतित्वा मंडुले चैंदोस्ततो नीहारसं
३३ पुतः भूमौ पतित्वा व्रीह्यादौ तत्र स्थित्वा चिरं पुनः १९ भूत्वा चतुर्विधं भोज्यं पुरुषे
र्भुज्यते ततः रेतो भूत्वा पुनस्तेन ऋतौ स्त्रीयोनिसिंचितः २० योनिरक्तेन संयुक्तं
जरायुपरिवेष्टितं दिनेनैकेन कललं भूत्वा रूदत्वमाप्नुयात् २१ तत्पुनः पंचरात्रे
ण बुद्बुदाकारतामियात् सप्तरात्रेण तदपि मांसपेशित्वमाप्नुयात् २२ पक्षमात्रेण
सा पेशी रुधिरेण परिप्लुता तस्या एवांकुरोत्पत्तिः पंचविंशतिरात्रिषु २३ ग्रीवा शिर
श्च स्कंधश्च पृष्ठवंशस्तथोदरं पंचधांगानि चैवं वै जायंते मासतः क्रमात् २४ पाणि ३३
पादौ तथा पार्श्वः कटिजानु तथैव च मासद्वयात्प्रजायंते क्रमेणैव न चान्यथा २५ त्रि
भिर्मासैः प्रजायंते अंगानां संधयः क्रमात् सर्वांगुल्यः प्रजायंते क्रमान्मासचतुष्टये
२६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नासाकर्णौ च नेत्रे च जायंते पंचमासतः दंतपंक्तिर्नखा गुह्यं पंचमे जायते तथा २७ अ
र्वाक् षण्मासतः छिद्रं कर्णयोर्भवति स्फुटं पायुर्मेढ्रमुपस्थं च नाभिश्चापि भवेन्नृणां
२८ सप्तमे मासि रोमाणि शिरः केशास्तथैव च विभक्तावयवत्वं च सर्वं संपद्यतेऽष्टमे
२९ जठरे वर्धते गर्भः स्त्रियाः एवं विहंगम पंचमे मासि चैतन्यं जीवः प्राप्नोति सर्व
शः ३० नाभिसूत्राल्परंध्रेण मातृभुक्तान्नसारतः वर्धते गर्भगः पिंडो न म्रियेत स्व न म्रियत इत्यर्थः
कर्मतः ३१ स्मृत्वा न्मासर्वाणि जन्मानि पूर्वकर्माणि सर्वशः जठरानलतप्तोऽयमि
दं वचनमब्रवीत् ३२ नानायोनिसहस्रेषु जायमानोऽनुभूतवान् पुत्रदारादिसं
बंधं कौशं च पशुबांधवान् ३३ कुटुंबभरणासक्त्या न्यायान्यायैर्धनार्जनं कृतं
नाकरवं विष्णुचिंतां स्वप्नेऽपि दुर्भगः ३४ इदानीं तत्फलं भुंजे गर्भदुःखं महत्तरं अ

कोटिश इति पाठांतरं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२२ अनुभूयेत्यस्य रक्षानीं गर्भदुःखं भुंजे इत्यनेनान्वयः

रा·किं·८ ग्राश्वतेग्राश्वतवत्देहेत्त्वासमन्वितः ३५ अकार्याण्येवकृतवान्नकृतंहितमा
३४ त्मनः इत्येवंबहुधादुःखमनुभूय स्वकर्मतः ३६ कदानिष्क्रमणंमेस्याद्गर्भान्निरय
सन्निभात् (इत्येवंबहुधादुःखमनुभूयचकर्मभिः) इतऊर्ध्वंनित्यमहंविष्णुमेवानुप्र
जये ३७ इत्यादिचिंतयन्जीवोयोनियंत्रप्रपीडितः जायमानोतिदुःखेननरका
त्सातकीयथा ३८ पूतिव्रणान्निपतितः कृमिरेषइवापरः ततोबाल्यादिदुःखा
निसर्वेएवंविभुंजते ३९ त्वयाचैवानुभूतानिसर्वत्रविदितानिच नवर्णितानिमे
गृध्रयौवनादिषुसर्वतः ४० एवंदेहोहमित्यस्मादभ्यासान्निरयादिकं गर्भवा
सादिदुःखानिनवंस्युर्निर्विशतः ४१ तस्माद्देहद्वयादन्यमात्मानंप्रकृतेःपरं ३४
ज्ञात्वादेहादिममतांत्यक्त्वाऽत्मज्ञानवान्भवेत् ४२ जाग्रदादिविनिर्मुक्तंसैज्ञानादि त्य

२९ अभ्यासाज्ज्ञातादभिनिवेशात्: अहंकर्त्तेत्याद्याकारात्

५१ अपरः कृमिरिवएवपततीतिशेषः।

३८ अतिदुःखेनजायमानः बहिः पततीतिशेषः यथानरकात्सातकी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लक्षणं शुद्धं बुद्धं महाज्ञानमात्मानमवधारयेत् ४३ चिदात्मनि परिज्ञाते नष्टे मो
हे ऽज्ञसंभवे देहः पततु वारब्धकर्मवेगेन तिष्ठतु ४४ योगिनो न विदुःखं वा सुखं
वा ऽज्ञानसंभवं तस्मात् देहे न सहितो यावत्प्रारब्धसंक्षयः ४५ तावत्तिष्ठ सुखेन त्वं
धृतकंचुकसर्पवत् अन्यत् वक्ष्यामि ते पक्षिन् शृणु मे परमं हितं ४६ त्रेतायुगे द्वा
शरथिर्भूत्वा नारायणोऽव्ययः रावणस्य वधार्थाय दंडकानागमिष्यति ४७ सीत
या भार्यया सार्धं लक्ष्मणेन समन्वितः तत्राश्रमे जनकजां भ्रातृभ्यां रहिते वने ४८
रावणश्चोरवन्नीत्वा लंकायां स्थापयिष्यति तस्याः सुग्रीवनिर्देशाद्वानराः परिमार्ग
णे ४९ आगमिष्यंति जलधेस्तीरं तत्र समागमः त्वया तैः कारणवशाद्भविष्यति न
संशयः ५० तदासीनास्थितिं तेभ्यः कथयस्व यथार्थतः न दैवतं वपक्षी द्वावुत्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रा॰किं॰ ८ त्वत्स्येते पुनर्नवौ ५१ संपातिरुवाच बोधयामास मां चंद्रनामा मुनिकुलेश्वरः।
पक्षौ पुनः पक्षौ मे जातौ नूतनौ अति कोमलौ ५२ स्वस्ति वोस्तु गमिष्यामि सीतां द्रक्ष्यथ
३५ रुप निश्चयं यत्नं कुरुध्वं दुर्लंघ्यसमुद्रस्य विनिने ५३ यन्नामस्मृतिमात्रतोऽपरिमितं
संसारवारां निधिं तीर्त्वा गच्छति दुर्जनोपि परमं विष्णोः पदं शाश्वतं तस्यैव स्थितिका
रिणस्त्रिजगतां रामस्य भक्ताः प्रियायूयं किं न समुद्रमात्रतरणे शक्ताः कथं वानराः
५४ ॥इति श्रीमदध्यात्मरामायणे किष्किंधाकांडेऽष्टमः सर्गः ८ श्रीमहादेव उ॰
गते विहायसा गृध्रराजे वानरपुंगवाः हर्षेण महताविष्टाः सीतादर्शनलालसाः
१ ऊचुः समुद्रं पश्यंतो महानक्रभयंकरं तरंगादिभिरुन्नद्धमाकाशमिव दुर्ग्रहं ३५
२ परस्परमवोचन्वै कथमेनं तरामहे उवाच चांगदस्तत्र शृणुध्वं वानरोत्तमाः
॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवंतोऽत्यंतबलिनः शूराश्च कृतविक्रमाः कोवात्र वारिधिं तीर्त्वा राजकार्यं करिष्यति
४ एतेषां वानराणां स प्राणदाता न संशयः अत्रोत्तिष्ठतु मे शीघ्रं पुरतो यो महाबलः
५ वानराणां च सर्वेषां रामसुग्रीवयोरपि स एव पालको भूयान्नात्र कार्या विचारणा भवेदित्यर्थ आर्षः
६ इत्युक्ते युवराजेन तूष्णीं वानरसैनिकाः आसन्नोचुः किंचिदपि परस्परविलोकि-
नः ७ अंगद उवाच उच्यतां वै बलं सर्वैः प्रत्येकं कार्यसिद्धये केन वा साध्यते कार्यं जा-
६ निश्चेष्यामह इत्यर्थः नीमस्तदनंतरं ८ अंगदस्य वचः श्रुत्वा प्रोचुर्वीरा बलं पृथक् योजनानां दशारभ्य
दशसंख्योत्तरोगु णोयस्यतं दशोत्तरगुणं जगुः ९ शतादर्वाक् जांबवांस्तु प्राह मध्ये वनौकसां पुरा त्रिविक्रमे
देवे पादं भूमानलक्षणं १० त्रिःसप्तकृत्वोऽहमगां प्रदक्षिणविधानतः इदानीं वा-
र्धकग्रस्तो नत्राक्रामि विलंघितुं ११ अंगदोप्याह मे गंतुं शक्यं पारं महोदधेः पुनर्ले-
३ त्रिविक्रमेऽवतीर्णे सति भूमानं भूपरिच्छेदः कार्यं यस्य तादृशं पादं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ए॰कि॰९ घनसामर्थ्येन जानाम्यस्ति वा न वा ॥ १२ तमाह जांबवान्वीर स्त्वं राजा नो नियामकः । न
३६ युक्तं त्वा नियोक्तुं मे त्वं समर्थोसि यद्यपि ॥ १३ अंगद उवाच एवं चेत्पूर्ववत्सर्वे स्वस्थ्या मो
दर्भविष्टरे केनापि न कृतं कार्यं जीवितुं च न शक्यते ॥ १४ तमाह जांबवान्वीरो दर्शयि
ष्यामि ते सुत । येनास्माकं कार्यसिद्धिर्भविष्यत्यचिरेण च ॥ १५ इत्युक्त्वा जांबवान्प्राह
हनूमंतमवस्थितं । हनूमन्किं रहस्तूष्णीं स्थीयते कार्यगौरवे ॥ १६ प्राप्ते ऽज्ञेनेव
सामर्थ्यं दर्शयाद्य महाबल । त्वं साक्षाद्वायुतनयो वायुतुल्यपराक्रमः ॥ १७ रामका
र्यार्थमेव त्वं जनितोसि महात्मना । जातमात्रेण ते पूर्वं दृष्ट्वोद्यंतं विभावसुं ॥ १८
पक्वं फलं जिघृक्षामीत्युत्प्लुतं बालचेष्टया । योजनानां पंचशतानं पतितोसि ततो भुवि ३६
१९ अतस्त्वद्बलमाहात्म्यं को वा शक्नोऽभिवर्णितुं । उत्तिष्ठ कुरु रामस्य कार्यं नः

ग्रहीष्यामीत्यर्थे आर्षः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाहि सुव्रत २० श्रुत्वा जांबवतो वाक्यं हनूमानतिहर्षितः चकार नादं सिंहस्य
ब्रह्मांडं स्फोटयन्निव २१ बभूव पर्वताकारस्त्रिविक्रम इवापरः हनूमानुवाच
शृण्वंतु वानराः सर्वे मम वाक्यं विशेषतः लंघयित्वा जलनिधिं कृत्वा लंकां च
भस्मसात् २२ रावणं सकुलं हत्वाऽनेष्ये जनकनंदिनीं यद्वा बध्वा गले रज्वा
रावणं वामपाणिना २३ लंकां सपर्वतां धृत्वा रामस्याग्रे क्षिपाम्यहं यद्वा दृष्ट्वैव
यास्यामि जानकीं शुभलक्षणां २४ श्रुत्वा हनुमतो वाक्यं जांबवानिदमब्रवी
त् दृष्ट्वैवागच्छ भद्रं ते जीवंतीं जानकीं शुभां २५ पश्चाद्रामेण सहितो दर्शयि
ष्यसि पौरुषं कल्याणं भवतात् भद्रं गच्छ त्वं विहायसा २६ गच्छंतं रामकार
यार्थं प्लवंगास्तमनुगच्छं तु कृत्वाशीर्भिः संमान्य विसृष्टः प्लवगाधिपैः २७
आशाभियोजयित्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

महेंद्राद्रिशिरोगत्वाबभूवाद्भुतदर्शनः २८ महानगेंद्रप्रतिमोमहात्मासुवर्णवर्णोरुणचारुवक्त्रः महाफणींद्राभसुदीर्घबाहुर्वातात्मजोदृश्यतसर्वभूतैः २९ ॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादेकिष्किंधाकांडेनवमःसर्गः ९ किष्किंधाकांडेशार्वेलोकेसुपुण्येनवसर्गः पंचशतानिश्लोकादुरितहराः पंचपंचाशत् शतयोजनविस्तीर्णंसमुद्रंमकरालयं लिलंघयिषुरानंदसंदोहोमारुतात्मजः १ ॥ किष्किंधाकांडसंपूर्णः ॥ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ किष्किंधाकांड समाप्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=13.07.20 15:16
,TRANSFERRED=2020/07/13 at 15:26:35
,PAGES=77
,TYPE=STD
,NAME=S0003300
,Book Name=M-2501-RAMAYAN KISKINDHA KAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection